संस्कृत वार्ताः

07.09.25

सायम्  - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य नवमे दिनाङ्के पञ्जाब्-राज्ये जलप्लावनस्य स्थितिं समीक्षितुं गमिष्यति।

· पञ्जाब, जम्मू-कश्मीर, हिमाचल-प्रदेश इत्येतेषु राज्येषु जलप्रलयस्थितिमाधृत्य सहाय्योद्धार-कार्याणि सजवं प्रचलन्ति।

· भारतीय ऋतु विज्ञान विभागेन अद्य गुजरात राजस्थानयोः अतिवृष्टेः अनुमानं विहितम्।

· जापान्-देशस्य प्रधानमन्त्री शिगेरु इशिबा इत्यनेन अद्य निर्वाचने पराजयानन्तरं त्यागपत्रं प्रदत्तम्।

· भारतेन विश्वव्यापारसङ्गठनेन सह मुक्त, निष्पक्ष, समावेशी-बहुपक्षीय-व्यापार-व्यवस्थायाः प्रतिबद्धता पुनः पुष्टिः कृता।

· विश्वधनुर्प्रतिस्पर्धायां भारतीय पुरुषयुगल वर्गेण अद्य दक्षिण कोरियायाः ग्वांगजू नगरे सञ्जाते विश्व चैंपियनशिप प्रतिस्पर्धायाः अन्तिमायां स्पर्धायां भारतीय दलेन स्वकीयं प्रथमं स्वर्ण-पदकं विजितम् ।

<u>पञ्जाब्-प्रधानमन्त्री-भ्रमणम्-</u>

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य नवमे दिनाङ्के जलप्लावनस्य स्थितिं समीक्षितुं पञ्जाब्-राज्यं गमिष्यति। सः व्यक्तिगतरूपेण स्थानीय-स्थित्याः मूल्याङ्कनं करिष्यति तथा च प्रभावितानां जनानां अधिकतमं साहाय्यं सुनिश्चेतुं वास्तविकतां अवगच्छति इति अपेक्ष्यते। पञ्जाब्-भाजपा-अध्यक्षः सुनील् जाखर् इत्येषः सोशल मीडिया सन्देशे अस्याः यात्रायाः पुष्टिम् अकरोत्। सः अवदत् यत् प्रधानमन्त्री सङ्कटकालस्य विषये अतीव चिन्तितः अस्ति, घटनाक्रमस्य निरीक्षणं च निकटतया कुर्वन् अस्ति। श्रीजाखरः पुनरुक्तवान् यत् भारतसर्वकारः पञ्जाब राज्यस्य जनैः सह दृढतया स्थितः अस्ति।

## पंजाब बाढ़

पञ्जाब, जम्मू-कश्मीर, हिमाचल-प्रदेश इत्येतेषु राज्येषु जलप्रलयस्थितिमाधृत्य सहाय्योद्धार-कार्याणि सजवं प्रचलन्ति। पञ्जाब राज्ये जलप्रलय-स्थितेः अनंतरं जनानां जीवनं सामान्यं प्रचलति। राज्ये जलप्रलयेन द्वि सहस्र ग्रामाणां प्रायः अशीतिसहस्राधिक त्रिलक्षाधिकाः जनाः प्रभाविताः अभवन्। आकाशवाण्याः सम्वाददात्रानुसारं स्थानीयप्रशासनम्, सेना, एनडीआरएफ, बीएसएफ चेत्यादयः सहाय्योद्धारकार्येषु प्रवृत्ताः सन्ति।

## प्रधानमन्त्री -श्री नारायणगुरोः

अद्य प्रधानमन्त्री नरेन्द्रमोदी श्री नारायणगुरोः जयन्त्यावसरे तस्य मनोवृत्तिं, समाजे तस्य प्रभावं च स्मरितवान्। एकस्मिन् सामाजिकसन्देशे प्रधानमन्त्रिणा उक्तं यत् सामाजिकसुधारस्य शिक्षायाः च प्रचारार्थं नारायणगुरोः आह्वानं यूनां कृते प्रेरणादायकः भविष्यति।

## जम्मू-कश्मीर-वर्षाः

जम्मू-कश्मीरे, अस्य मासस्य द्वादश दिनाङ्कपर्यन्तं सम्पूर्णे जम्मू-कश्मीर्-प्रदेशे अविरामवृष्टिः, मेघगर्जनं च भविष्यति इति ऋतु-विभागेन पूर्वानुमानं प्रकटितम् अस्ति, परञ्च किमपि प्रमुखस्य ऋतोः गतिविधिः निराकृतम्। विभागस्य अनुसारं श्वः पर्यन्तं व्यापकः प्रकोपः भवितुम् अर्हति, यत्र अनेकेषु स्थानेषु निम्नवृष्टिः भविष्यति। जम्मू-सम्भागस्य केषुचित् मण्डलेषु रात्रौ अपराह्णे प्रातःकाले वा मध्यमवृष्टिः भवितुं शक्नोति। सितम्बर-मासस्य नव दिनाङ्कात् द्वादश दिनाङ्कपर्यन्तं सम्पूर्णे केन्द्रशासितप्रदेशे पृथक् स्थानेषु वृष्टेः सम्भावना वर्तते। तत्रैव जम्मू-श्रीनगर-राष्ट्रिय-राजमार्गः अद्य निरन्तरं षष्ठदिवसे अपि यातायाताय अवरुद्धः अस्ति।

## ऋतु विज्ञान

भारत ऋतु विज्ञान विभागेन अद्य गुजरात राजस्थानयोः अतिवृष्टेः अनुमानं विहितम् । ऋतु विज्ञान विभागानुसारं हरियाणा, चंडीगढ़, दिल्ली, उत्तराखंडेषु अग्रिमेषु द्वि - त्रि दिवसेषु भूरि वृष्टेः संभावना अस्ति। तमिलनाडु, केरल, माहे, लक्षद्वीप, तटीय आंध्र प्रदेश, यनम चेत्येषु राज्येषु एवमेव स्थितेः संभावना वर्तते। ऋतु विज्ञान विभागेन श्वः यावत् असम, नागालैंड, मणिपुर, मिज़ोरम त्रिपुरा इत्येतेषु राज्येषु अपि अल्प वृष्टेः संभावना प्रकटिता। सममेव विभागेन आगामि

पञ्च दिवसावधौ आंध्र प्रदेश, यनम, रायलसीमा चेत्येषु तटीय क्षेत्रेषु तीव्रवायोः अनुमानं प्रकटितम्।

<u>जपान् पी. एम्.-रेज़िन्ः</u>

जापान्-देशस्य प्रधानमन्त्री शिगेरु इशिबा इत्यनेन अद्य निर्वाचने पराजयानन्तरं त्यागपत्रं प्रदत्तम्, येन तस्य सत्तारूढस्य लिबरल्-डेमोक्रैटिक्-दलस्य, एल्. डि. पि. इत्यस्य, संसदीय-बहुमतस्य च क्षतिः अभवत्। एकस्मिन् वार्ताहर सम्मेलने इशिबा वर्यः अवदत् यत् सः लिबरल्-डेमोक्राटिक्-दलस्य अध्यक्षपदात् अपि त्यागपत्रं दातुं निश्चितवान्। अयं निर्णयः अपेक्षितस्य दलस्य निर्वाचनात् पूर्वमेव अभवत्, येन सः निष्कासितुं बाध्यः स्यात्। श्री इशिबा उत्तराधिकारिणः चयनं यावत् प्रधानमन्त्री भविष्यति।

<u>भारत-एससीओ व्यापारमेलनम् :</u>

भारतेन विश्वव्यापारसङ्गठनेन सह मुक्त, निष्पक्ष, समावेशी-बहुपक्षीय-व्यापार-व्यवस्थायाः प्रतिबद्धता पुनः पुष्टिः कृता। ह्यः व्लादिवोस्तोक्-नगरे आयोजितायां शङ्घाई-सहकार-सङ्गठनस्य उद्योगमन्त्रिणां- उपवेशने भारतेन सह समृद्ध्यै एससीओ-सङ्घटनस्य सामूहिक-शक्तेः लाभं ग्रहणाय संभाव्य विषयेऽपि बलं प्रदत्तम्। वाणिज्य-उद्योगमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् देशे निर्यातविविधिकरणे, निर्भरता न्यूनीकरणे, आपूर्तिशृङ्खलानां निर्माणे च आवश्यकता प्रकाशिता अस्ति। भारतेन व्यापारप्रवाहं वर्धयितुं, दुर्बलतां निवारणाय, सम्पूर्णे क्षेत्रे समावेशीवृद्धिः समर्थनाय च समन्वितकार्याणां महत्त्वे अपि बलं प्रदत्तम्।

<u>बिहार्-महिला-योजना</u>

बिहार-राज्ये मुख्यमन्त्री नितीश-कुमारः अद्य मुख्यमन्त्री-महिला-रोजगार-योजनेति महिलानां कृते वृत्यावसरान् प्रदातुं नूतन-योजना प्रारब्धवान्। मुख्यमन्त्रिणा योजनायाः लोकप्रियतायै प्रचारयानानां ध्वजं प्रदर्श्य योजना पोर्टल इत्यस्य उद्घाटनं च अकरोत्। अस्याः योजनायाः अन्तर्गतं राज्यस्य प्रत्येकपरिवारात् एका महिला स्वेच्छानुसारं व्यवसायस्य कृते आर्थिकसाहाय्यं प्राप्स्यति। वित्तीयसहायतायाः प्रथम-देयमूल्यरूपेण, प्रत्येकस्याः महिलायाः बैंक लेखायां डी. बी. टी. माध्यमेन दशसहस्र रूप्यकाणि आगमिष्यन्ति। ग्रामीणविकासविभागः अस्याः योजनायाः नोडल्-

एजेन्सीति भविष्यति तथा च बिहार-ग्रामीण-आजीविका-प्रोत्साहन-समितिः, जीविका, तस्य निष्पादनं करिष्यति।

## चन्द्र ग्रहणम्

अद्य रात्रौ सम्पूर्णे भारते एका खगोलीय घटना भविष्यति । अद्य रात्रौ पूर्णं चन्द्रग्रहणम् भविष्यति। एतत् ग्रहणं सम्पूर्णे भारते स्पष्टतया द्रष्टुम् शक्यते। एतत् चन्द्रग्रहणं अष्टवादनादधिक अष्टपञ्चाशत् निमेषात् आरभ्य श्वः प्रायः सार्ध द्वि वादन पर्यंतं प्रचलिष्यति।

## विश्वधनुर्प्रतिस्पर्धा

विश्वधनुर्प्रतिस्पर्धायां भारतीय पुरुषयुगल वर्गेण अद्य ऐतिह्यं विरचितम्। दक्षिण कोरियायाः ग्वांगजू नगरे सञ्जाते विश्व चैंपियनशिप प्रतिस्पर्धायाः अन्तिमायां स्पर्धायां भारतीय दलेन फ्रांस दलं पराजित्य स्वकीयं प्रथमं स्वर्ण पदकं विजितम् ।

।। इति वार्ता:।।